# टिळक महाराष्ट्र विद्यापीठ, पुणे

**19E**

## संस्कृत विशारद (बी. ए.)– बहि:स्थ

**परीक्षा : मे – २०२४**

**सत्र ४ थे**

**विषय: भारतचम्पू (19E444)**

**दिनांक: ०४/०६/२०२४** **गुण : ८०** **वेळ : स. १०.०० ते दु. १.००**

सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र.१. केषामपि चतुर्णां स्वभाषया अनुवादः करणीयः।** (२४)

१) मा भून्नाशो युगपदिति नो भीरुभिर्जातु पौरैः पूर्वैर्लब्ध्वावसरमसकृत्प्रार्थनाभिः प्रक्लृप्तम् ।
एकैकस्मिन्नहनि वितरत्येकमेकं पुमांसं कृत्वा तस्मै बलिमिह जनस्तुङ्गमन्नस्य राशिम् ।।

२) भूभुजोऽस्य सविधे विचरन्त्योर्भोजमद्रसुतयोर्दृशि शोभाम् ।
जेतुकाममिव सर्वसमष्ठ्या प्रादुरास पुरतो मृगयूथम् ।।

३) एवमश्रान्तमृगयापरिश्रान्तमपरिमितस्वेदशीकरनिकरकोरकितफालमूलमातेनिरे तमाश्यानं तुहिनगिरिदेश्या नन्दनीयमन्दिमानो मानससरोरविन्दमकरन्दबिन्दुसन्दोहसौरभीपारदृश्वानो मातरिश्वानः ।।

४) अपरेद्युरपि पुनराजीवन्तं निद्रारुणनयनराजीवं तं स मुग्धधीः स्निग्ध इव जग्धिकेलिकायामारालिककर–दापितकवलनिचोलितकरालगरलविह्वलं प्रह्वलम्बिशिरसं रज्जुभिः परिणाह्यपरिणाहिनीभिरसुहृदां हृदि शूलं शूलकीलिते निर्जरसरिदन्तर्जले विसर्जयामास ।।

५) अथ कदाचन मृगयोपलालितहृदयो नरेश्वरोऽयमश्वे शशिश्वेततेजसि विश्वातिशायिनि रयविजितमातरिश्वनि कृताधिरोहः पार्श्वधृतविश्वकद्रुभिरनेकवागुरोपकरणानुरोधैर्योधैरनुद्रुतो मृदुभद्रविनयाभ्यां यदुमद्रतनयाभ्या–मनुविद्धः सिद्धगणगणनीयमहिमवतो हिमवतोऽवजगाहे महतीमटवीतटवीथिकाम् ।।

६) तुहिनकिरणवंशस्थूलमुक्ताफलानां विपुलभुजविराजद्वीरलक्ष्मीविभूम्नाम् ।
हसितसुरपुरश्रीरस्ति सा हस्तिनाख्या रिपुजनदुरवापा राजधानी कुरूणाम् ।।

**प्र.२. ससंदर्भं चतुर्णां स्पष्टीकरणं लिखत ।** (२४)

१) मृषायमब्धेरजनीति वार्ता ।
२) मलिनतामनयन्त कलेवरं मदकलाः कलभा इव धूलिभिः ।
३) नयनाम्बुभिः स विदधे लोकं नदीमातृकम् ।
४) दर्भोऽपि सिंहासनतां जगाहे ।
५) समीरसुनूं समुपेत्य जिह्वाबहिःप्रसारान् बहुशो वितेनुः ।
६) पञ्चतामपि परां धनञ्जयप्रापणेन जतुधाम्नि मेनिरे ।
७) आशीर्द्वयं वपुषि चायुषि च प्रतेनुः ।

**प्र.३. सविस्तरं द्वौ लिखत ।** (२२)

१) लाक्षागृहवृत्तान्तः ।
२) राजधानीवर्णनम् ।
३) पाण्डवबाल्यवर्णनम् ।

**प्र.४. अ) रूपपरिचयं लिखत ।** (०४)

विनिर्गताः एतस्मै आधाय धार्यमाणम्

**आ) संधिविग्रहं कुरुत ।** (०३)

चापविद्यामापाद्यापि भून्नाशो युगपदिति हिमवतोऽवजगाहे

**इ) समासानां नामनिर्देशपूर्वकं विग्रहं कुरुत ।** (०३)

हलधरेण श्रुतिवर्णपद्धतिः कृपामन्दमनाः

--------------